# Dashavatara Prarthana

# दशावतारप्रार्थना

## Document Information

Text title : Dashavatara Prarthana

File name : dashAvatAraprArthanA.itx

Category : vishhnu, dashAvatAra

Location : doc_vishhnu

Author : raNganAthasUri

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2023

*sanskritdocuments.org*

# दशावतारप्रार्थना

मत्स्यरूपिणो भगवतः प्रार्थना-
त्रय्या दुर्जयदानवेन्द्रहृतया वैयाकुलीं प्रापिते
नालीकासनमानसे सरसिजे भानोरपायेन वा ।
मध्येऽम्भोनिधि यः प्रहृत्य तमरिं वाणीं पुराणीं पुनः
प्रादात् तस्य यथापुरं स तनुतां श्रीमत्स्यमूर्तिः श्रियम् ॥ १॥

कूर्मरूपिणो भगवतः प्रार्थना-
यच्छ्वासानिलपर्युदस्तजलधिक्रोडोच्चलद्वीचिका-
वेधःसौधविघट्टनोद्भटरवो ब्रह्माण्डमास्फोटयन् ।
दैत्यान् मोहयतो हरेर्दिविषदां पीयूषदानक्षणे
साहाय्यं विततान शर्म कुहनामूर्तिः स निर्मातु नः ॥ २॥

वराहरूपिणो भगवतः प्रार्थना-
दंष्ट्राग्रे पृथुसीम्नि यस्य जलधेरुन्मग्नमूर्तेः पुरा
घोणे घुर्घुरघूर्णमानतनुतामासेदुषी मेदिनी ।
प्रीता शैलशिखाधिरोहजनितामाधत्त दिव्यां श्रियं
मायासूकरशेखरः स दिशतामामोदभूमोदयम् ॥ ३॥

नरसिंहरूपिणो भगवतः प्रार्थना-
दंष्ट्रांशूच्चयपाण्डरैर्नखमुखैर्दैत्येन्द्रवक्षःस्थली-
निष्ठ्यूतामितकुङ्कुमाभरुधिरप्राग्भारसम्भावितैः ।
मालिन्यं द्युसदां ममार्ज हृदये प्रह्लादमाह्लादयन्
यः पूर्वं तमिमं भजेम शरणं वैकुण्ठकण्ठीरवम् ॥ ४॥

वामनरूपिणो भगवतः प्रार्थना-
आसीद् यस्य वितानमम्बरसरित् पूर्वं परस्तादसौ
शीर्षत्राणमभूदथो गलतले मन्दारमालाभवत् ।
जाता धौतमथांशुकं कटितटे पादारविन्दे ततः

सम्पेदे मधुबिन्दुरीतिमवतात् याज्ञावटुस्तद्वटुः ॥ ५॥

परशुरामरूपिणो भगवतः प्रार्थना-
दृप्तक्षत्रवधाध्वरे पितृवधामर्षोदयाद् दीक्षितो
बाहा हेहयनायकस्य समिधः साहस्रमप्युज्ज्वलाः ।
धाराग्रज्वलदाशुशुक्षणिशिखामध्ये कुठारस्य यो
निस्तन्द्रं जुहुवाम्बभूव मुनिराडव्यादभव्यात् स नः ॥ ६॥

श्रीरामभद्ररूपिणो भगवतः प्रार्थना-
वीरः कोऽपि सकृन्नतार्तिहरणश्रद्धाविशुद्धाशयः
कामं कामपि सम्पदं वितनुतामाकल्पमल्पेतराम् ।
यस्यापाङ्गजशोणिमा स्तनतटे सेहे न मुक्ताश्रियं
नेत्रे कज्जलकालिमानमपि च क्रव्यादवामभ्रुवाम् ॥ ७॥

बलभद्ररूपिणो भगवतः प्रार्थना-
यस्याहुर्मुसलं हलं प्रहरणं सङ्ग्रामसीमाजुषो
भेत्तुं वैरिशिरोधनान् नमयितुं चान्यानपेक्षं बुधाः ।
येनाकार्षि च हस्तिनं कुरुमदज्वालारुजं जाह्नवी-
पूरे त्याजयितुं स लाङ्गलधरः कुर्वीत गुर्वीं श्रियम् ॥ ८॥

श्रीकृष्णरूपिणो भगवतः प्रार्थना-
अन्विष्टोऽपि चिरादकृत्रिमगिरां श्रेणीभिरेणीदृशां
गोपालाह्वयजन्मनां तु सुलभं स्वात्मानमाधत्त यः ।
यो विश्वस्य नियन्तृतामनुभवन्नप्यावहद् दूततां
बध्नीमोऽञ्जलिमादरेण करुणादिग्धाय मुग्धात्मने ॥ ९॥

कल्किरूपिणो भगवतः प्रार्थना-
राजन्यापशन्दैर्जगद्विपदलङ्कर्मीणचर्यापदै-
र्निर्मूले निखिले कलेरुपचयाद् धर्मे महीमण्डले ।
प्रादुर्भूय कृपाणपाणिरथ तान् निर्धूय भूयः पुरा
धर्मं कार्तयुगं प्रवर्तयति यः कल्की श्रियै कल्पताम् ॥ १०॥

इति कौशिकरङ्गनाथसूरिः सुकुमारैः पदगुम्भनैः स्तुवन् सन् ।
परमं पुरुषं दशावतारम् । -।- ।- । शोभते कृतार्थः ॥

इति रङ्गनाथसूरिविरचिता श्रीदशावतार प्रार्थना समाप्ता ।
स्तोत्रसमुच्चयः २ (६१)

Proofread by Rajesh Thyagarajan

*Dashavatara Prarthana*

pdf was typeset on May 11, 2023

Please send corrections to *sanskrit@cheerful.com*